Postal Regd.No. GAMC- 1553/2019-2021

ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १४ अङ्क : १६३
डिसेम्बर - २०१९

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### अधर्मं चिन्तयेत् प्राज्ञः

कोऽपि मनुष्यः नास्तिकः चेत् सः अधार्मिकः भवति ? तथा नास्ति। लोके कोटिशः जनाः तादृशाः अपि जीवन्ति, ते ईश्वरे वेदेषु वा श्रद्धां न कुर्वन्ति। परन्तु तेषां सत्य-अहिंसा-कारुण्यादिषु गुणेषु महती श्रद्धा वर्तते। प्रत्युत, पुण्यलोलुपाः मनुष्याः धनस्य बलेन तीर्थस्थानेषु अविरतं भ्रमन्ति। वस्तुतः ते अधार्मिकाः एव। उच्चन्यायालयस्य पूर्वन्यायमूर्तिः मार्कण्डेयः कात्जुः निवेदयति यत् 'भारते प्रतिशतं नवतिः मनुष्याः मूढाः सन्ति। यतो हि ते अन्धपरम्परया कुलग्राहेण (casteism) च आक्रान्ताः सन्ति।' तथा च यः गुरुः मन्दानां शिष्याणाम् अज्ञानावृतया श्रद्धया स्वीयम् उदरं विस्तारयति सः धर्मस्य शत्रुः अस्ति। अस्माकं परम्परायां सनातनधर्मस्य महती पूजा अभवत्। साम्प्रतं परिपक्वेन विवेकेन धर्मस्य पुनःपरिष्कारः आवश्यकः।

दूरदर्शने अपि श्रद्धायाः वेषेण अश्रद्धा नृत्यति। बहवः स्वार्थतत्पराः धर्मोपदेशकाः अशास्त्रीयं मनोरञ्जनं कारयन्ति। तत्र दर्श्यमानासु धारावाहिनीषु विविधानां देवानां कथाभिः सह संश्लिष्टा अन्धश्रद्धा प्रजानां मनांसि मलिनयति। धर्मक्षेत्रं प्रविष्टम् एतत् मालिन्यं शिक्षणस्य वर्धमाने प्रमाणे दूरीभविष्यति इति आशा अपि पुरातनी अभवत्। यदा प्रशिक्षिताः जनाः अपि धर्मशुद्धिं प्रति प्राकृताः इव आचरणं कुर्वन्ति तदा आश्चर्यं भवति। अस्माकं देशे धर्मस्य यावतीं हानिं नास्तिकाः न कृतवन्तः तावतीं हानिम् एतादृशाः मन्दबुद्धयः आस्तिकाः कृतवन्तः। अशिक्षितः कृषिकः क्षम्यः अस्ति, किन्तु अविवेकी वैद्यः क्षम्यः नास्ति।

प्रगाढे तमसि अपि क्वचित् दीपदर्शनं भवति। केषुचित् आश्रमेषु तपः, शान्तिः, शौचं, सत्यम् अहिंसा च धर्मक्षेत्रे विद्यमानं परिमलं प्रसारयन्ति। एतादृशाः सत्यपूताः सत्त्वसम्पन्नाः वा आश्रमाः निन्दाभाजः न भवेयुः। तत्रत्याः धर्मगुरवः अपि निराकुलाः भवेयुः। तदर्थं किं कर्तुं शक्यते ? सम्यक् अवलोकनेन अध्ययनेन च सम्पादितः विवेकः अत्र साहाय्यं कर्तुं शक्नोति। प्रजाभिः कृता विवेकसाधना हंसबकयोः भेदं ज्ञापयिष्यति। एवं धर्मं चिन्तयन् मनुष्यः अधर्मम् अपि चिन्तयेत्।

कपटगुरुः अविवेकस्य छिद्रात् एव प्रविश्य ईश्वरायते। भारते कृत्रिमाः ईश्वराः वर्धमानाः सन्ति। अत्र 'कुटुम्बनियोजनम्' आवश्यकम्। यत्र बकचारिणः गुरवः पूज्यन्ते तत्र आस्तिकतायाः वासः न भवति। निर्मला नास्तिकता शोभते, न तु कुटिला आस्तिकता। श्रद्धा पवित्रा अस्ति, किन्तु तत्र मिश्रितं मालिन्यं प्रशस्तिं नार्हति। यः एतावत् जानाति सः मनुष्यः आस्तिकः वा नास्तिकः वा, मम पूज्यः अस्ति।

# नाणकदानपुण्यम्

कस्मिंश्चित् ग्रामे प्रभुगुप्तनामकः कश्चन वणिक् आसीत्। सः धनमेव जीवितं मन्यते स्म। तस्य एषा कृपणता पत्न्यै मीनाक्ष्यै न रोचते स्म। सा पुण्यकार्याय अनुरोधपूर्वकं धनव्ययं कारयति स्म पत्युः द्वारा।

प्रभुगुप्तः महाधनिकः। किन्तु सन्तानहीनः सः। तस्मात् कारणात् सः सदा दुःखितः भवति स्म। सन्ततिं प्राप्तुं तस्य पत्नी मीनाक्षी अनेकविदानि पुण्यकार्याणि, पूजादिकं च कृतवती। किन्तु सर्वं निष्फलं जातम्।

अनेन श्रान्ता मीनाक्षी एकदा सङ्कल्पम् अकरोत् यत् यदि मम सन्ततिः भविष्यति तर्हि देहे स्थितानि सर्वाणि आभरणानि देवाय अर्पयिष्यामि, तेनैव सह पत्युः वाणिज्ये वर्षस्य लाभः यः भवति तस्य शतांसं देवालयस्य धनपेटिकायां स्थापयिष्यामि इति।

एतस्य सङ्कल्पस्य फलमिव मीनाक्षी गर्भवती सञ्जाता। नवमासानन्तरं सा पुत्रं प्रसूतवती अपि। ततः सा आत्मना कृतं सङ्कल्पं पतिम् उक्त्वा तस्य पूरणाय अनुरोधं कृतवती।

प्रभुगुप्तः तस्याः सङ्कल्पविषयं श्रुत्वा आश्चर्यचकितः सन् अवदत्– ''भवत्याः बुद्धिः किं नष्टा ? देहे स्थितानाम् आभरणानां मूल्यं न्यूनातिन्यूनं द्विसहस्ररूप्यकात्मकं भवेत्। लाभस्य शतांशः कियत् स्यात् इति भवती जानाति किम् ? एतादृशं विषयम् इतः परं मम पुरतः मा वदतु'' इति।

मीनाक्षी पत्युः वचनात् क्रुद्धा सती – ''एतादृशे विषये कदापि 'न' इति न वक्तव्यम्। एषः भगवता सम्बद्धः विषयः। यदि पुत्रस्य किमपि जायेत तर्हि मम मरणं निश्चितम्। अतः एतस्मिन् विषये जागरूकता भवतु'' इति उक्तवती।

इदानीं प्रभुगुप्तः निरुपायः सन् पत्न्याः वचनं पालयितुं सिद्धः अभवत्।

ततः कानिचन दिनानि गतानि। एकदा प्रभुगुप्तः पत्नीपुत्राभ्यां सह सङ्कल्पं पूरयितुं देवालयं गतः। मीनाक्षी सङ्कल्पानुगुणं देवाय अर्पयितुम् आभरणानि धृतवती। प्रभुगुप्तः निश्चितवान् आसीत् यत् स्वस्य वाणिज्यात् प्राप्तस्य लाभस्य शतांशः नाम सहस्रं रूप्यकाणि इति।

'भगवते यत् दातव्यं तद्विषये वञ्चना मास्तु' इति मीनाक्षी प्रस्थानात् पूर्वमेव पतिं स्मारितवती। ततः मार्गव्ययार्थं सहस्रं रूप्यकाणि स्वीकृत्य प्रस्थितवान् प्रभुगुप्तः। यदा बहिः आगत्य द्वारं कीलयितुम् उद्युक्तं तदा गृहस्य पुरतः उपविष्टं कञ्चन संन्यासिनं दृष्टवान् सः।

सः सन्यासी प्रभुगुप्तम् अवदत् – ''भोः, पुण्यतीर्थदर्शनार्थं गमनसमये दानादिकं खलु करणीयम् ? गतरात्रितः मया किमपि न भुक्तम्। खाद्यं किमपि दीयताम्'' इति।

''अये ! अलम् उपदेशेन। भवते अन्नस्य दानात् यत् अल्पं पुण्यं प्राप्येत तत् मह्यं न आवश्यकम्। अहं सहस्रस्य रूप्यकाणां दानं कृत्वा महत् एव पुण्यं सम्पादयितुं प्रस्थितः अस्मि'' इति उक्तवान् प्रभुगुप्तः।

प्रभुगुप्तस्य वचनेन पत्नी मीनाक्षी नितराम् असन्तुष्टा। सा स्यूततः लड्डुकद्वयं निष्कास्य पतिः यथा न पश्येत् तथा तस्मै संन्यासिने दत्तवती। अपि च स्वसमीपे स्थितानी द्वित्राणि नाणकानि अपि तस्मै दत्तवती सा।

मीनाक्ष्या यदा संन्यासिने धनं दत्तं तदा प्रभुगुप्तः दूरात् तत् दृष्टवान् एव। सः पत्नीं तर्जितवान् – ''अहो, भवती सर्वं धनं गमनात् पूर्वमेव व्ययीकरोति चेत् आगमनानन्तरं भिक्षा याच्यते किम् ?'' इति।

पुण्यतीर्थं गत्वा देवालयगमनात् पूर्वं प्रभुगुप्तः मीनाक्ष्याः हस्ते सहस्रं रूप्यकाणि ददत् उक्तवान्– ''मम समीपे पुनः सहस्रं रूप्यकाणि सन्ति। सहस्रं रूप्यकाणि देवालये पेटिकायां अर्पयाम। अन्यदेकं सहस्रं मार्गव्ययाय भवतु'' इति।

भगवतः दर्शनसमये मीनाक्षी स्वस्य आभरणैः सह पत्या दत्तानि सहस्रं रूप्यकाणि अपि देवाय अर्पितवती। प्रभुगुप्तः अपि पत्न्या कृतम् अपश्यन् सहस्रं रूप्यकाणि देवाय अर्पितवान्।

उभौ अपि देवालयात् बहिः आगतौ। तदा प्रभुगुप्तः – ''रूप्यकाणि जागरूकतया रक्षतु। अत्र सर्वत्रापि चोराः सन्ति'' इति मीनाक्षीम् उक्तवान्।

''रूप्यकाणि भवतः समीपे सन्ति खलु। मम समीपे स्थितं मया देवाय अर्पितम्'' इति मीनाक्ष्या उक्तम्।

तदा झटिति प्रभुगप्तेन ज्ञातं यत् प्रमादः जातः इति। 'देवाय अर्पणीयम्' इत्येतावदेव ताभ्यां चर्चितम् आसीत्। किन्तु केन अर्पणीयम् इति न निर्णीतम् आसीत्। तस्मात् उभाभ्याम् अपि अर्पितम् आसीत्।

पतिं पश्यन्ती मीनाक्षी पृष्टवती– ''भगवते यत् धनम् अर्पणीयम् आसीत् तद्विषये कापि वञ्चना तु न कृता किल भवता ?'' इति।

प्रभुगुप्तः लज्जया शिरः नमितवान्। ततः उभयोः समीपे यत् किञ्चित् धनम् आसीत् तस्य उपयोगेन एव ताभ्यां प्रतिप्रयाणं करणीयम् अभवत्। यावत् आसीत् तत् एकस्य प्रयाणार्थम् अपि अपर्याप्तम् आसीत्। अतः प्रत्यागमनसमये उपवासेन याचनेन च बहुधा क्लेशान् अनुभूय तौ गृहं प्रत्यागतवन्तौ।

बहूनां दिनानाम् अनन्तरम् आगतं प्रभुगुप्तं द्रष्टुं ग्रामीणाः केचन तस्य गृहम् आगताः। आश्चर्यस्य विषयः नाम प्रभुगुप्तस्य प्रस्थानसमये यः संन्यासी आगतः आसीत् सः इदानीमपि तत्रैव आसीत्।

संन्यासी प्रभुगुप्तं दृष्ट्वा – ''भवतां तीर्थयात्रा सुसम्पन्ना किल ?'' इति पृष्टवान्।

प्रभुगुप्तः असहनया – ''आम्। सर्वं सुसम्पन्नम्। मार्गे याचनां कुर्वन्तौ आवां प्रत्यागतौ'' इति उक्तवान्।

''एतं विषयं भवान् गमनसमये एव उक्तवान् किल ? अस्तु, मया गम्यते'' इति कथयन् संन्यासी ततः प्रस्थितः। तदा काचन महिला खेदेन उक्तवती – ''आत्मना यत् अधिकम् औदार्यं दर्शितं तस्य निमित्तं योग्यः पुरस्कारः लब्धः तेन'' इति।

तस्याः वचनं श्रुत्वा – ''कः अभिप्रायः भवत्याः?'' इति ताम् आश्चर्येण पृष्टवान् प्रभुगुप्तः।

''श्रूयताम्। यदा भवन्तः इतः प्रस्थिताः तदारभ्य एषः संन्यासी शुनकवत् भवतां गृहं रक्षितवान्। परह्यः यदा भवतां गृहं चोराः आगताः तदा एषः उच्चैः आक्रोशन् सर्वान् समावेशितवान्। अन्यथा भवतां सर्वा अपि सम्पत्तिः नष्टा अभविष्यत्। किन्तु तादृशं चोरम् इव भावितवान् भवान्'' इति सा महिला प्रभुगुप्तं निन्दितवती।

''नाणकदानपुण्यात् एव अस्माकं रक्षणम् अभवत्'' इति मीनाक्षी पतिं पश्यन्ती उक्तवती।

प्रभुगुप्तःस्वस्य मूर्खतां निन्दन् पश्चातापं प्राकटयत्। ततः प्रभृति सः सर्वेभ्यः दानं ददत् 'महादाता' इति ख्यातिं लब्धवान्।

# विश्वस्य राष्ट्रे भारतस्य स्थानम्

डॉ. सुखेश्वरः झा

भारतम् अतीव प्राचीनो देशः। दुष्यन्तस्य शकुन्तलायाः जातः पुत्रः 'भरत'-नामा विख्यातः अभवत् इति श्रूयते। सः बाल एव स्वस्थविलक्षणस्य भविष्यस्य सूचनां ददाति स्म। व्याघ्र-शिशुं सिंह-शावकं च कर्णयोः गृहीत्वा, आकृष्य तथाविधेन जन्तुना सः अपूर्ण-पञ्चम-समः एव क्रीडति स्म। व्याघ्री व्याघ्रो वा, सिंही सिंहो वा, निरीहाः असहायाः दासाः इव तस्य पुरस्तात् भवन्ति स्म। तस्यैव अनुपम-वीरस्य नाम्नि इदं भारतवर्षं कथ्यते। दशरथसुतो रामानुजोऽपिभरतो महात्मा महाँश्च वीरः समजनि। कश्चन ऋषिरपि भारताभिजनो भरताभिधानोऽजनिष्ट। अनयोरन्यतरस्य अपि नाम 'भारतम्' इति नामकरणस्य आधारः स्यात्।

भा - कान्तिः, रतम् - कान्तम्, भया रतम् - भारतम्, कान्तिकान्तम्; किम्वा भायाम्-प्रभायाम्, रतम् - लीनम् - भारतम्, प्रभालीनम् इति कमपि हृद्यम् अर्थम् एतत् पदम् अभिधत्ते। यथा विद्वांसः कथयन्ति, तदनुसारं ज्ञानप्रभायाः उदयः अस्याम् एव भूमौ चिरं प्राग् अजायत इति, अतः 'भारतम्' इति पदेन अभिधीयमानस्य अर्थस्य निर्दिष्ट-पूर्वस्य साध्वी सङ्गतिः प्रतिभाति। सप्तसु महादेशेषु अन्यतमः वर्तते 'एशिया'-महादेशः। तत्र एशिया-महादेशे अनेकेषां देशानाम् अन्यतमः प्रमुखो देशः 'भारतवर्षम्' उपमहादेशः कथ्यते।

एष देशः विषुवत् (Equator) रेखातः पूर्णतः उत्तरदिशि (8°4' तथा 37°6' मध्ये) वर्तते। तथा प्रधान-मध्याह्न रेखा (Prime meridian or O° Longiture) तः 68°7' तः 97°25' - अष्टाषष्टि डिग्रीसप्तमिनट इति तथा सप्त-नवति-डिग्री-पञ्चविंशति मिनट इति - अनयोः मध्ये) पूर्व भागे वर्तते। भारतस्य सम्पूर्णः अवकाशः (स्थानम्) 32,87,782 वर्ग-किलोमीटर परिमितः अस्ति। उत्तरतः दक्षिणान्तं यावत् विस्तारः माकिम् 3,214 कि.मी. परिमितः तथा पश्चिमसीमातः पूर्वसीमा पर्यन्तम् देशस्य विस्तारः 2,933 कि.मी. परिमितः कथ्यते। भारतस्य भूसीमा-लम्बता 15,000 कि.मी. परिमिता तथा समूद्रतटसीमा लम्बता 6,100 कि.मी. परिमिता निर्धार्यते।

अस्य देशस्य सभ्यता संस्कृतिश्च अतिप्राचीने महत्त्वपूर्णे च मन्येते। एष देशः संसारे प्रमुखानां देशानाम् अन्यतमः। न केवलं प्राचीनाः नवीनाः वा अस्मद्देशीया ऋषयः विद्वांसः एव वा अस्य महत्त्वं ख्यापयन्ति, अपि तु मैक्समूलर, विल्सनमैक्डोनल कीथ-ग्रिफिथ-विन्टरनित्स-प्रभृतयः भारतीय-विद्याध्येतारः पाश्चात्या विद्वांसः अपि एतत् स्वीकुर्वन्ति यत् भारतदेशः जगति अद्भुततमः इति ! मानवसभ्यतायाः विकासस्य इतिहासे अस्याः भुवः अत्युत्कृष्टं स्थानम्। मानवैः यत् किमपि श्रेष्ठतरम् अद्भुतं रहस्यमयम् दृष्टम्, विचारितम्, मानवेभ्यः प्रदत्तम् तत् भारतीयाकाशतले भारतीयभूमावेव इति। स्वभावतः 'गुरु' रिति गौरवपूर्णेन नाम्ना अस्य देशस्य आह्वानं विश्वनिवासिभिः अतिप्राचीन-काले कृतम् इति श्रूयते। वेदाः, उपनिषदः, रामायणम्, महाभारतम्, पुराणानि, योगदर्शनम् अन्यानि च दर्शनानि, विविधानि शास्त्राणि च विश्वमानवतायाः कृते विलक्षणानि अवदानानि सन्ति। वाढम्, आधुनिकस्य भारतस्य सा प्रतिष्ठा न वर्तते या प्राचीनभारतस्य आसीत्। किन्तु प्राचीनः इतिहासः सदातनः प्राकृतिकोवैभवश्च सदा अनेन सह तिष्ठतः। सहस्राब्दीतः अत्र अनेकानि राजनीतिक परिवर्तनानि सञ्जातानि। प्राचीनः भारतीयः चिन्तनमार्गः अक्षुण्णः नातिष्ठत्। अतः दुरति-क्रमस्य कालस्य गतेः प्रभावात् आधुनिके-ज्ञान-विज्ञान-क्षेत्रे तादृशम् स्थानम् अनेन देशेन न निर्मितं यादृशं अमरीकादेशेन, रुसदेशेन वा निर्मितम्। अतः अद्यतन-विचार-क्षेत्रे अस्य न्यूनता वर्तते इति स्वीकरणीयम् एव।

अस्माभिः भारतीयैः अस्य विषयस्य अनुभवः करणीयः। अस्य देशस्य पुनरपि तथाविधस्य महत्त्वस्य प्राप्तिः यथा स्यात् तथा चिन्तनीयम्। शक्तेः, मानवशक्तेः, चिन्तनशक्तेः, भूशक्तेः वा अभावो न विद्यते। अस्याः शक्तेः नैतिकतया समुचितः उपयोगः यदि भवेत् तदा पुनः अचिरेणैव कालेन अस्य राष्ट्रस्य संसारे तादृशम् एव स्थानम् लब्धं भविष्यति यादृषं प्रागासीत्। पुनः वाल्मीकि-व्यास-कालिदास-आर्यभट्टाः उत्पन्नाः स्युः पुनः तक्षशिला-नालन्दा-विक्रमशिला-सदृशानि ज्ञानसंस्थानानि अवश्यं संभविष्यन्ति इति दृढो मे विश्वासः।

## Programme Schedule - 2020-21

| Sr No | Month | Programme | Duration & Starting Date | Time | Day |
|---|---|---|---|---|---|
| 1 | Jan | वेदपाठः ( निश्चितांशः ) | 01/01/20 to 27/03/20 | 06:30pm to 08:00pm | Wednesday-Friday |
| 2 | Jan | मार्गदर्शनम् ( व्याकरणम् ) Class 10 | 16/01/20 to 25/01/20 | 11:00am to 12:30pm | Daily |
| 3 | March | संस्कृत-सम्भाषण-वर्गः ( प्रथमः स्तरः ) | 02/03/20 to 29/05/20 | 06:30pm to 08:00pm | Monday-Wednesday Friday |
| 4 | April | छन्दःपरिचयः | 01/04/20 to 01/05/20 | 06:30pm to 08:00pm | Wednesday-Friday |
| 5 | May | ग्रीष्मवर्गः<br>बालसंस्कारकेन्द्रम् ( Cl.1 to 8 )<br>बालसंस्कृतशिबिरम् ( Cl. 9 ) (with feedback)<br>मार्गदर्शनम् ( व्याकरणम् ) ( Cl.10 ) (with feedback) | 04/05/20 to 14/05/20 | 10:00am to 11:30am<br>10:00am to 11:30am<br>08:00am to 09:30am | Daily<br>Daily<br>Daily |
| 6 | June | संस्कृत-सम्भाषण-वर्गः ( प्रथमः स्तरः ) | 01/06/20 to 31/08/20 | 06:30pm to 08:00pm | Monday-Wednesday Friday |
| 7 | June | Value Education Through Sanskrit बालसंस्कारकेन्द्रम् (Class SKg to 4) | 13/06/20 to 10/04/21 | 05:30pm to 07:00pm | Saturday |
| 8 | June | Value Education Through Sanskrit बालसंस्कारकेन्द्रम् (Class SKg to 4) | 14/06/20 to 11/04/21 | 11:00am to 12:30pm | Sunday |
| 9 | June | बालसंस्कृतवर्गः (Class 5 to 8) | 14/06/20 to 11/04/21 | 11:00am to 12:30pm | Sunday |
| 10 | July | स्तोत्रपाठः ( शिवपूजनम्, शिवमहिम्नः स्तोत्रं च ) | 02/07/20 to 30/07/20 | 06:30pm to 08:00pm | Tuesday -Thursday |
| 11 | Aug | स्तोत्रपाठः ( मातृपूजनम्, शक्रादयस्तुतिः च ) | 04/08/20 to 03/09/20 | 06:30pm to 08:00pm | Tuesday- Thursday |
| 12 | Sep | संस्कृत-सम्भाषण-वर्गः ( द्वितीयः स्तरः ) | 02/09/20 to 30/11/20 | 06:30pm to 8:00pm | Monday-Wednesday Friday |
| 13 | Sept | Diploma in Sanskrit Teaching | 03/09/20 to 27/05/21 | 06:00pm to 08:00pm | Tuesday- Thursday |
| 14 | Nov | दीपावलीवर्गः<br>बालसंस्कारकेन्द्रम् ( Cl.1 to 8 )<br>बालसंस्कृतशिबिरम् ( Cl. 9 )<br>मार्गदर्शनम् ( व्याकरणम् ) ( Cl.10 ) | 18/11/20 to 27/11/20 | 10:00am to 11:30am<br>10:00am to 11:30am<br>08:00am to 09:30am | Daily<br>Daily<br>Daily |
| 15 | Dec | संस्कृत-सम्भाषण-वर्गः ( प्रथमः स्तरः ) | 02/12/20 to 26/02/21 | 06:30pm to 08:00pm | Monday-Wednesday Friday |

- **For more information contact : Dr. Mihir Upadhyay Mobile: 98246 16237**

Core House, Off CG Road Ahmedabad 380 006 • www.eklavyasanskritacademy.org • E-mail: mihiresa@gmail.com

## कृपया हसन्तु

पिता - (पुत्रम् उद्दीश्य) भो पुत्र ! परीक्षायां गणितविषये त्वया कति गुणाः प्राप्ताः ?

पुत्रः - भ्रातुः अपेक्षया मया दशगुणाः न्यूनाः प्राप्ताः ।

पिता - भवतु, भ्रात्रा कति गुणाः प्राप्ताः सन्ति ?

पुत्रः - तेन दश गुणाः प्राप्ताः सन्ति ।

★ ★ ★ ★ ★

पुत्रः - (पितरम् उद्दीश्य) पितः, भो पितः ! एन्टार्कटिका कुत्र वर्तते ?

पिता - मां मा पीडय । एतस्मिन् गृहे सर्वाणि वसूनि तव माता एव स्थापयति । तां पृच्छ ।

★ ★ ★ ★ ★

रमणः - (नमनम् उद्दीश्य) एकः सप्ताहः सम्पन्नः, मया पत्न्या सह वार्तालापः एव न कृतः ।

नमनः - कथम् एवं खलु ?

रमणः - त्वं तु जानासि कोऽपि वदति तदा मध्ये सम्भाषणं मह्यं न रोचते ।

★ ★ ★ ★ ★

शिक्षकः - ब्रूहि नरेश ! एतादृशं किं वस्तु वर्तते यत् दृश्यते, परन्तु तस्य स्पर्शः कर्तुं न शक्यते ।

छात्रः - गुरवः भवतां शिरस्थिता शिखा । अस्माभिः सा द्रष्टुं शक्यते, परन्तु स्प्रष्टुं न शक्यते ।

## अहो चातुर्यम्

– संस्कृतविकिपिडीयाजालस्थानात्

**मृता मोहमयी माता जातो ज्ञानमयः सुतः ।**
**आशौचं वर्तते नित्यं कथं सन्ध्यामुपास्महे ॥**

कश्चन वटुः सन्ध्यावन्दनात् पराङ्मुखः आसीत् । कदाचित् तस्य मित्रं तम् अपृच्छत् – 'किं भवान् सन्ध्यावन्दनं न करोति ?' इति । 'मम आशौचम्' इति अवदत् सः वटुः । 'भवता कदापि सन्ध्यावन्दनं कृतं न दृष्टं मया । किं प्रतिदिनं आशौचं भवतः ?' इति अपृच्छत् मित्रम् । 'अथ किम् ? प्रतिदिनं मोहमयी माता मृता भवति ज्ञानमयः सुतः जायते । एतस्मात् प्रतिदिनं जाताशौचं, मरणाशौचं च मम । अतः एव सन्ध्यावन्दनं न क्रियते मया' इति अवदत् सः वटुः । व्याजकथकाः व्याजत्वेन किं किं न कथयेयुः ?

**आनन्दबाष्परोमाञ्चाः यस्य स्वेच्छावशंवदाः ।**
**किं तस्य साधनैरन्यैः किङ्कराः सर्वपार्थिवाः ॥**

इच्छानुगुणं यः आनन्दं बाष्पं रोमाञ्चं च प्रदर्शयितुं शक्नोति सः, भूमिपतीन् धनिकान् अधिकारिणः वा वशीकर्तुम् अन्यत् साधनं न अपेक्षते । पुरतः स्थितस्य मनः प्रसन्नं यथा स्यात् तथा आचरन्तः बहवः अद्यापि स्वस्य इष्टं साधयन्ति एव । इष्टसाधनम् एव यस्य उद्देशः, सः किं किं न कुर्यात् ?

## ज्ञानसरिता



**घोरिकाशब्दस्य उत्पत्तिः** – भवन्तः कदाचित् असमाप्तनिद्राः सन्तः प्रातः उत्थितवन्तः स्युः कस्यचित् घोरिकाशब्दात् पीडिताः सन्तः रात्रौ। घोरिका न उपहासस्य विषयः। ये तं शब्दं शृण्वन्ति अपरिहार्यतया ते महान्तं कष्टम् अनुभवन्ति इति तु सत्यम्। किमर्थं वा घोरिका उत्पद्यते ? कण्ठमार्गे नासिकायां वा यदा बाधा उत्पद्यते (पीनसकारणतः अननुगुणताकारणतः वा) तदा घोरिकायाः उत्पत्तिः भवति। यदा कश्चित् उत्तानशायी भवति तदा घोरिकायाः आरम्भः भवति। तदवसरे अधराहनुः उद्घाटितः भवति। यदा श्वासोच्छ्वासः भवति तदा अलिजिह्वायाः मृदु अग्रं कम्पते। (एषा अलिजिह्वा जिह्वामूले कण्ठस्य अन्तः तिष्ठति) तदा घोरिकाशब्दस्य उत्पत्तिः भवति।

**शीघ्रं शुष्यन्ती मषी** – 'बोल्पेन्' नामिकाः लेखन्यः एषु दिनेषु जनप्रियाः। सर्वत्र उपयुज्यन्ते ताः। यत्र मषी पूरणीया तादृश्यः लेखन्यः विरलाः जाताः।'बोल्पेन्' इति एतासां लेखनीनां नाम किमर्थं जातम् इति किं भवन्तः जानन्ति ? लेखन्याः अन्तः पुनःपूरणी भवति खलु। तस्याः अग्रभागे लघु लोहगोलकं भवति। यदा वयं लिखामः तदा एतत् गोलकं भ्रमत् मषीं पत्रं प्रति प्रेषयति। गोलकम् अतिक्रम्य मषी प्रवहति यत् तस्य कारणं –सा मषी तैलमयी नवनीतम् इव चिक्कणमयी च भवति। मषी शीघ्रं शुष्यति। 'फौण्टन्' जातीयासु लेखनीषु मद्यसारनिर्मिता मषी उपयुज्यते। अतः तस्याः शुष्कीभवने विलम्बः। जलम् इतोऽपि विलम्बेन शुष्यति। 'बोल्पेन्' तन्त्रज्ञानं प्रायः १८८० तमवर्षस्य अनन्तरं ज्ञातम्। तथापि एतत् तन्त्रज्ञानम् उपयुज्य एदम्प्राथम्येन लेखनी तु निर्मिता १९३० तमे वर्षे हङ्गरीदेशे लास्लाजोर्जबिरोनामकाभ्याम्।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **समावर्तनम्** | लौटना | return |
| **समावेशः** | सम्मिलित होना | inclusion |
| **समासः** | संक्षेप | abridgment |
| **समहारः** | संग्रह | collection |
| **समाहितः** | मिलाया गया | mingled |
| **समाह्वः** | चुनौती | challenge |
| **समाह्वयः** | ललकारना | challenging |
| **समित्** | युद्ध | battle |
| **समितिः** | सभा | meeting |
| **समीक्षा** | समालोचना | criticism |
| **समीचीन** | ठीक | correct |
| **समीरः** | वायु | air |
| **समीहा** | इच्छा | desire |
| **समुच्चयः** | संग्रह | collection |
| **समुत्कर्षः** | उन्नति | exaltation |

## किं भवन्तः जानन्ति ?

**१ ) सङ्गीतरत्नाकरस्य रचयिता कः वर्तते ?**

(क) तानसेनः (ख) सारङ्गदेवः (ग) सोमनाथः (घ) गोविन्ददीक्षितः

**२ ) 'रागविबोधः' इति सङ्गीतग्रन्थस्य रचयिता कः वर्तते ?**

(क) गोविन्ददीक्षितः (ख) सारङ्गदेवः (ग) सोमनाथः (घ) तानसेनः

**३ ) महाभारतग्रन्थस्य रचना कस्मिन् छन्दसि जाता वर्तते ?**

(क) अनुष्टुप् (ख) भुजङ्गप्रयातः (ग) रोला (घ) हरिगीतिका

**४ ) 'सङ्गीतसुधा' इति प्रख्यातसङ्गीतग्रन्थस्य रचयिता कः वर्तते ?**

(क) सारङ्गदेवः (ख) सोमनाथः (ग) तानसेनः (घ) गोविन्ददीक्षितः

**५ ) 'वन्दे मातरम्' गीतं एतेषु कस्मिन् ग्रन्थे वर्तते ?**

(क) गीताञ्जलि (ख) गोदान (ग) आनन्दमठ (घ) देवदास

**६ ) 'गुरुमुखी' इति लिपिः कस्याः भाषायाः वर्तते ?**

(क) सिन्धी (ख) पञ्जाबी (ग) डोगरी (घ) कन्नड

**७ ) एतेषु कः ज्योतिषग्रन्थः वराहमिहिरेण रचितः वर्तते ?**

(क) वेदाङ्गज्योतिषम् (ख) पञ्चसिद्धान्तिका (ग) सिद्धान्तशिरोमणिः (घ) आर्यभटीय

उत्तराणि – (१) ख (२) ग (३) क (४) घ (५) ग (६) ख (७) ख

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## वेदपाठः
## ( निश्चितांशः )

**Date :** 01/01/20 to 27/03/20
**Day :** Wed-Fri
**Time :** 6:30 am to 8:00 am
**Fees :** 4000/-

- **Venue :** Eklavya Sanskrit Academy
  Core House, Nr Parimal Garden,
  Ellisbridge Ahmedabad
- **Contact:** Dr. Mihir Upadhyay,
  Mobile: 98246 16237

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

# Admission Open

**Value Education Through Sanskrit**

## बालसंस्कारकेन्द्रम्
**(Class SKg to 4)**

## बालसंस्कृतवर्गः
**(Class 5 to 8)**

**Date :** 13/06/20 to 10/04/21
**Day :** Saturday
**Time :** 5.30pm to 7.00pm
**Fees :** 5000/-

- **Venue :** Eklavya Sanskrit Academy
  Core House, , Nr Parimal Garden,
  Ellisbridge Ahmedabad
- **Contact:** Dr. Mihir Upadhyay,
  Mobile: 98246 16237

संस्कृत-
## साम्प्रतम्

नमस्कारः
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

### ग्राहक शुल्कम्

वार्षिकं रू - 100
द्वैवार्षिकं रू - 175
त्रैवार्षिकं रू - 250
अङ्कमूल्यं रू - 10

**प्रियवाचकाः**
- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006